साधिष्ठ, त्रि, (अयमेषामतिशयेन बाढ़ः । बाढ़ + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "अन्तिकबाढ़योर्नेदसाधौ ।" ५ । ३ । ६३ । इति साधादेशः ।) अतिशयबाढ़ः । दृढ़तमः । इत्यमरः । ३ । १ । ११२ ॥ न्याय्यः । इति हेमचन्द्रः ॥ अत्यार्य्यः । इति मेदिनी ॥ (यथा, छान्दोग्ये । ४ । ९ । ३ ।
"श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्य्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति ॥")

साधीयान् [स्] त्रि, (अयमनयोरतिशयेन बाढ़ः । इति । बाढ़ + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५।३।५७ । इति ईयसुन् । "अन्तिकबाढ़योरिति ।" ५ । ३ । ६० । इति साधादेशः ।) अतिशयबाढ़ः । अतिशयसाधुः । इत्यमरः । ३।३।२३४ ॥ (यथा, साहित्यदर्पणे १ परिच्छेदे ।
"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यादिति ॥")

साधुः, पुं, (साध्नोति निष्पादयति धर्म्मादिकार्य्यमिति । साध + "कृवापाजीति ।" उणा० १ । १ । इति उण् ।) उत्तमकुलोद्भवः । तत्पर्य्यायः ॥ महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ सज्जनः ६ । इत्यमरः । २ । ७ । ३ ॥ कुलजः ७ साधुजः ८ कुलकः ९ कुलिकः १० । इति शब्दरत्नावली ॥ कुल्यः ११ कौलेयकः १२ इति भरतः ॥ जिनः । मुनिः । इति हेमचन्द्रः ॥*॥ साधुलक्षणं यथा, —

"यथालब्धोऽपि सन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः ॥१॥
निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्ज्जितः ।
निरपेक्षो मुनिर्व्वीतरागः साधुरिहोच्यते ॥२॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः ॥३॥
समचित्तो मुनिः पूतो गोविन्दचरणाश्रयः ।
सर्व्वभूतदयः कार्ष्णी विवेकी साधुरुत्तमः ॥४॥
कृष्णार्पितप्राणशरीरबुद्धिः
शान्तेन्द्रियस्त्रीसुतसम्पदादिः ।
आसक्तचित्तः श्रवणादिभक्ति-
र्यस्येह साधुः सततं हरेर्यः ॥ ५ ॥
कृष्णाश्रयः कृष्णकथानुरक्तः
कृष्णेष्टमन्त्रस्मृतिपूजनीयः ।
कृष्णानिशं ध्यानमनास्त्वनन्यो
यो वै स साधुर्म्मुनिवर्य्यकार्ष्णः ॥"६॥
इति पाद्मोत्तरखण्डे ९९ अध्यायः ॥ * ॥

अन्यच्च ।
"न प्रहृष्यति सम्माने नावमानेन कुप्यति ।
न क्रुद्धः परुषं ब्रूयादेतत् साधोस्तु लक्षणम् ॥"
इति गारुड़े । ११३ । ४२ ॥ * ॥

तस्य स्वभावो यथा, —
"त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥
परार्थमुद्यताः सन्तः सन्तः किं किं न कुर्व्वते ।
तादृगप्यम्बुधेर्व्वारि जलदैस्तत् प्रपीयते ॥
एक एव सतां मार्गो यदङ्गीकृतपालनम् ।
दहन्तमकरोत् क्रोड़े पावकं यदपां पतिः ॥
आत्मानं पीड़यित्वापि साधुः सुखयते परम् ।
ह्लादयन्नाश्रितान् वृक्षो दुःखञ्च सहते स्वयम् ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

(तथा, महानिर्व्वाणतन्त्रे । १ । २२ ।
"देवायतनगा मर्त्त्या देवकल्पा दृढ़व्रताः ।
सत्यधर्म्मपराः सर्व्वे साधवः सत्यवादिनः ॥")

तस्य प्रशंसा यथा, —
यत्पूजायां भवेत् पूज्यो दृष्ट्या न यमदर्शनम् ।
पापसंघः स्पर्शनाच्च किमहो साधुसङ्गमः ॥
साधूनां हृदयं धर्म्मो वाचो वो नः सनातनाः ।
कर्म्मक्षयाणि कर्म्माणि यतः साधुर्हरिः स्वयम् ॥"
इति कल्किपुराणे ३० अध्यायः ॥*॥

(एतदाचारस्तु चतुर्व्विधधर्म्मप्रमाणान्यतमः । यथा, मनुः । २ । ६ ।
"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥")

कलिशूद्रस्त्रीणां साधुत्वं तत्कारणञ्च यथा ।
"कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति योषितः ।
यच्चाह भगवान् साधुर्धन्याश्चेति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न चेत् गुह्यं महामुने ।
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
श्रूयतां भो मुनिगणा यदुक्तं साधु साध्विति ।
यत् कृते दशभिर्व्वर्षैस्त्रेतायां हायनेन तत् ॥
द्वापरे तच्च मासेन अहोरात्रेण तत् कलौ ।
तपसो ब्रह्मचर्य्यस्य जपादेश्च फलं द्विजाः ॥
प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम् ।
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ॥
यदाप्नोति तदाप्नोति कलौ संकीर्त्त्य केशवम् ।
धर्म्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ॥
स्वल्पायासेन धर्म्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः ॥*
व्रतचर्य्यापरैर्ग्राह्या वेदाः पूर्व्वं द्विजातिभिः ।
ततस्तु धर्म्मसंप्राप्तैर्यष्टव्यं विधिवद्धनैः ॥
वृथाकथा वृथाभोज्यं वृथेज्या च द्विजन्मनाम् ।
पतनाय तथा भाव्यं तैस्तु संयमिभिः सदा ॥
असम्यक्करणे दोषास्तेषां सर्व्वेषु वस्तुषु ।
भक्ष्यपेयादिकं चैषां नेच्छाप्राप्तिकरं द्विजाः ॥
पारतन्त्र्यं समस्तेषु तेषां कार्य्येषु वै यतः ।
जयन्ति ते निजान् लोकान् क्लेशेन महता द्विजाः ॥
द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान् ।
निजं जयति वै लोकं शूद्रो धन्यतरस्ततः ॥
भक्ष्याभक्ष्येषु नास्यास्ति पेयापेयेषु वा यतः ।
नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितम् ॥
स्वधर्म्मस्याविरोधेन नरैर्लब्धं धनं सदा ।
प्रतिपाद्यञ्च पात्रेषु यष्टव्यञ्च यथाविधि ॥
तस्यार्ज्जने महान् क्लेशः पालने च द्विजोत्तमाः ।
तथा सद्विनियोगाय विज्ञेयं गहनं नृणाम् ॥
एभिरन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः ।
निजान् जयन्ति वै लोकान् प्राजापत्यादिकान् क्रमात् ॥
योषित्शुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा ।
कुर्व्वती समवाप्नोति तत्सालोक्यं ततो द्विजाः ॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
तृतीयं व्याहृतं तेन मया साध्विति योषिताम् ॥"
इति विष्णुपुराणे । ६ । २ । १२—२९ ॥

साधुः, त्रि, (साध्नोति कार्य्यमिति । साध + उण् ।) वार्द्धुषिकः । चारुः । (यथा, महाभारते । १ । १०७ । ८ ।
"न किञ्चिद्वचनं राजन्नब्रवीत् साध्वसाधु वा ॥")
सज्जनः । इति मेदिनी ॥

साधुजः, त्रि, (साधौ सत्कुले जायते इति । जन + डः ।) उत्तमकुलोद्भवः । इति शब्दरत्नावली ॥

साधुधीः, स्त्री, (साधुर्धीर्यस्याः ।) श्वश्रूः । इति हारावली ।२०१॥ (साधुर्धीः ।) सुन्दरबुद्धिः । तद्युक्ते, त्रि ॥

साधुपुष्पं, क्ली, (साधु चारु पुष्पं यस्य ।) स्थलपद्मम् । इति शब्दमाला ॥ उत्तमकुसुमञ्च ॥

साधुवाहः, पुं, (साधुरुत्तमो वाहः ।) विनीताश्वः । इति हेमचन्द्रः ॥ सुन्दरवाहनञ्च ॥

साधुवाही, [न्] पुं, (साधु उत्तमं वहतीति । वह + णिनिः ।) शोभनवहनशीलघोटकः । सुशिक्षिताश्वः । तत्पर्य्यायः । विनीतः २ । इत्यमरः । २।८।४४ ॥ सुष्ठुवाहनशीलकः ३ । इति शब्दरत्नावली ॥ सुन्दरघोटकविशिष्टे, त्रि ॥ (साधुवहनशीले, त्रि । यथा, महाभारते । ६ । ४६ । ३६ ।
"तस्य क्रुद्धः स नागेन्द्रो वहतः साधुवाहिनः ।
पदा युगमधिष्ठाय जघान चतुरो हयान् ॥")

साधुवृक्षः, पुं, (साधुर्वृक्षः ।) कदम्बतरुः । इति शब्दचन्द्रिका ॥ वरुणवृक्षः । इति राजनिर्घण्टः ॥ शोभनतरुश्च ॥

साधुवृत्तिः, स्त्री, उत्तमजीविका । सद्विवरणम् । सुन्दरवर्त्तनम् । साध्वी चासौ वृत्तिश्चेति कर्म्मधारयसमासनिष्पन्ना । साधोर्वृत्तिरिति षष्ठीतत्पुरुषसमासनिष्पन्ना वा ॥

साध्वृतं, क्ली, मयूरसमूहः । पक्षवीथी । आतपत्रम् । इत्यजयपालः ॥

साध्यः, पुं, (साध्यमस्त्यस्येति । अर्शआदित्वादच् ।) गणदेवताविशेषः । इत्यमरः । १ । १ । १० ॥ स तु द्वादशसंख्यकः । यथा, भरतः ।
"साध्या द्वादशविख्याता रुद्राश्चैकादश स्मृताः ॥"
तेषां नामानि यथा, —
"मनो मन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान् ।
विनिर्भयो नयश्चैव दंसो नारायणो वृषः ।
प्रभुश्चेति समाख्याताः साध्या द्वादश पौर्व्विकाः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥